# पंचम्यर्थविचारे ध्रुवपदार्थविवेचनम्

**माण्डवीशरण त्रिपाठी**

अपादाने पंचमी इति सूत्रे अपादानमेव पंचम्यर्थः। अपादानं च ध्रुवमपायेऽपादानम् इति सूत्रेणावधिरूपमेव। विश्लेषजनकं क्रियायाम् अवधिभूतं कारकमपादानसंज्ञकमित्यर्थः। अवधिरेव पंचम्यर्थ इति वैयाकरणाः। यथोक्तं नागेशभट्टेन–पंचम्यर्थोऽवधिरिति। भूषणकारोऽप्याह– अवधिः पंचम्यर्थेति, किन्तु अवधित्व (ध्रुवत्व) स्वरूपे विमतिर्दृश्यते। यथा भूषणकारादयः प्राचीनवैयाकरणाप्रकृतधात्वर्थप्रधानीभूतव्यापारानानश्रयत्वे सति तज्जन्यविभागाश्रयत्वं ध्रुवत्वमिति वदन्ति। भर्तृहरिरपि–

**अपाये यदुदासीनं चलं वा यदि वाऽचलम्**
**ध्रुवमेवातदावेशात् तदपादानमुच्यते।**
**पततोध्रुव एवाश्वो यस्मादश्वात् पतत्यसौ**
**तस्याप्यश्वस्य पतने कुड्यादिध्रुवमीष्यते।।**

तद्व्याख्यानं कुर्वता कौण्डभट्टेन कथितम्–अपायेविश्लेषहेतु–क्रियायाम् उदासीनम्–अनाश्रय अतदादेशात् तत्क्रियानाश्रयत्वात् एवं च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वं फलितम्।

एवं च अवधिभूतो ध्रुवो द्विविधो भवति, सक्रियः निष्क्रियश्चेति प्रतिपादितम्। चलं वा यदि वा चलम् इत्युक्तया। तत्र सक्रियोऽवधिः ''धावतोऽश्वात् पतति'' इत्यत्र अश्वे, निष्क्रियश्च ''ग्रामादायाति, वृक्षात् पत्राणि पतन्ति'' इत्यादौ ग्रामादीनां बोध्यः।

ननु कुड्यात् ''पततोऽश्वात् पतति चैत्रः'' इत्यत्र अश्वस्यावधित्वं न स्यात् विश्लेषहेतुपतनक्रियाश्रयत्वादिति चेदुच्यते लक्षणे विश्लेषसामान्यं नापेक्ष्यते अपितु तद्व्यक्तित्वेनैव। अर्थात् तद्विश्लेषहेतुक्रियानाश्रयत्वे सति तद् विश्लेषाश्रयत्वमिति ध्रुवस्य लक्षणम्। एवं च यन्निरूपितमवधित्वं चिकीर्षितं तत्क्रियानाश्रयत्वमपेक्ष्यते तथा च पततोऽश्वात् पतति चैत्र अत्र चैत्रविष्ठविश्लेषजनकपतनक्रियानिरूपितावधित्वमश्वे चिकीर्षितं तत्क्रिया–नाश्रयत्वम् अश्वे विद्यत एव, तत्क्रियायाः चैत्रादिनिष्ठत्वात्। एवं अश्वनिष्ठा या पतनक्रिया तन्निरूपिताऽबधित्वं कुड्ये तस्मादश्व– कुड्योरुभयोरपि ध्रुवत्वं निर्विवादमेव। एवंच कुड्याबधिकपतनाश्रयो योऽश्वस्तदवधिकं चेत्रनिष्ठं पतनमिति बोधः।

नन्वेवमपि ''परस्परान्मेषावपसरतः'' इत्यादौ यत्र मेषद्वयनिष्ठ विश्लेषजनकक्रियाद्वयजन्यः एक एव विभागः, तत्र विश्लेषजनक क्रियाश्रयत्वादुभयोर्मेषयोरपादानत्वं न स्यादिति चेत् ? उच्यते एकस्मिन्नेव विभागे तद्विभागजनकक्रियाव्यक्तिभेदात् भिन्ना। एवं चैतन्मेषनिष्ठक्रियायाः मेषान्तरेऽभावेनोभयोरपादानत्वं सम्भवति। एवं चैतन्मेषनिष्ठा या पद्व्यक्तिरूपा विश्लेषजनकक्रिया, मेषान्तरतदनाश्रयत्वे अपादानत्वं, स्वनिष्ठतत्क्रियाव्यक्त्याश्रयत्वेन च कर्तृत्वं सिद्धयति। अतएवोक्तं भर्तृहरिणा–

**मेषान्तरक्रियापेक्षमवधित्वं पृथक्–पृथक्।**
**मेषयोस्वक्रियापेक्षं कर्तृत्वंच पृथक्–पृथक्।।**

अत्र कौण्डभट्टेनापि कथितम्–यथानिश्चलमेषादपसरद् द्वितीयमेषस्थले निश्चलमेषस्यापसरन्मेषक्रियामादाय ध्रुवत्वम्, तथाऽत्रापि विभागैक्येऽपि क्रियाभेदादेकक्रियामादाय परस्य ध्रुवत्वम्। तथा च विश्लेषाश्रयत्वे सति तज्जनकतत्क्रियायामपादानत्वं वाच्यम्।

''परस्परान्मेषावपसरतः'' इत्यत्र अपादानत्वसिद्धये इयमेव युक्तिराश्रिता भट्टोजिदीक्षितेनाऽपि।

उक्तं च ''परस्परान्मेषावपसरतः'' इत्यत्र तु सृधातुना गतिद्धय–स्याप्युपादानादेक निष्ठां गतिं प्रतीतरस्यापादानत्वं न विरूद्धयेत्।

वस्तुतस्तु–अपरसरणं विभागपूर्वकपृष्ठतोगमनम्। तस्य मेषद्धय–निष्ठत्वादाश्रयभेदेन भिन्नत्वेऽपि सृधातुना निवृत्तभेदस्यैवापसरणस्य प्रतीतिः। तथा चोक्तं कैयटेन– ''आख्यातवाच्या क्रिया सर्वैव निवृत्तभेदाप्रतीयते'' भवद्भिरास्यते'' इत्यादौ वस्तुस्थित्या कर्तृभेदात् भेदेऽपि तिङन्ताद्भेदस्य अनवगमात्''। एवंचाश्रयगतभेदारोपेण द्विवचना–दुत्पतेरुभयोरपि तत्क्रियाश्रयत्वेन कर्तृत्वेमव स्यान्नापादानत्वम्। अतएवोक्तं भाष्ये ''न तिङन्तान्येकशेषारम्भं प्रयोजयन्ति किं कारणम्?'' एका हि क्रिया'' इति। तस्मात् क्रियाभेदमादायकर्तृत्वापादानत्वप्रतिपादनपरं भर्तृहरि–कौण्डभट्ट–भट्टोजिदीक्षितानां मतमसमीचीनमेव भाष्य विरुद्धत्वात्।

''न सोऽस्ति प्रत्ययोलोके यः शब्दानुगमादृते'' इति हर्युक्त्या शब्दालिङ्गितस्यैवार्थस्य सर्वज्ञानविषयतायाःवैयाकरणसम्मतत्वात् तादृश–शब्दभेदादेवात्र कर्तृत्वमपादानत्वंचोपपादनीयम्। एवं च मेषपदोपात्तयोरेव क्रियाश्रयत्वात् कर्तृत्वं, परस्परपदोपात्तयोर्विभागाश्रयत्वादपादानत्वं

भविष्यति। अतएव ''देवदत्तयज्ञदत्तावन्योन्यमाश्लिष्यतः इत्यत्र देवदत्तयज्ञदत्तयोः कर्मत्वं सिद्धयति। अन्यथा तु तत्रापि परत्वात् कर्तृसंज्ञैव स्यात्। शब्दरूपोपाधिकृतभेदमादायैव, चैत्र आत्मानं हन्तीत्यादावे–कस्यैवकर्तृत्वकर्मत्वोपपत्तिः। एवञ्च ''परस्परान्मेषावपसरतः'' इत्यत्रापि शब्दरूपोपाधिकृतभेदमादायैव कर्तृत्वापादानत्वोपत्तिः युक्ता। नागेशेनाऽपि प्रतिपादितं चैतत्– ''किञ्च मेषपदवाच्ययोः पुशविशेषयोः क्रियाश्रयत्व–विवक्षा, परस्परपदवाच्ययोस्तयोस्तु विभागाश्रयत्वविवक्षेत्यौपाधिकस्तयोर्भेदः। शब्दस्वरूपोपाधिकृत भेदोऽप्यर्थे गृह्यते। यथाऽऽत्मानमात्मना वेत्तीत्यादौ शरीरावच्छिन्नं कर्तृ–अन्तःकरणावच्छिन्नं करणं, निरवच्छिन्नं निरीहं कर्म, एकस्यैवशब्दभेदाद्भेदः, शब्दालिंगितस्यैव सर्वत्रभानात्।

नागेशमतम्–नागेशभट्टास्तु कौण्डाभिमते विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वरूपेऽपादानत्वे भाष्यविरोधमुपवर्णयन्ति। तथाहि धावतः पतितः इत्यादौ ध्रुवत्वाभावादपदानत्वं न स्यादित्याशंकितं भाष्ये। इत्थमाशंक्य च'' नवा ध्रौव्यस्या विवक्षितत्वादित्येव।'' कथं पुनः सतो नामाविवक्षा स्यात्? सतोऽप्यविवक्षा भवतीति'' समाहितं तत्रैव भाष्ये। एवञ्चात्र अश्वे विश्लेषहेतुपत् धात्वर्थ क्रियानांश्रयत्वेनाध्रुवत्वस्यासत्वात्'' अध्रौव्यस्या विवक्षा स्यात्, सतोप्य विवक्षा भवति'' इतिभाष्यात् विरोधः स्पष्ट एव कौण्डभट्टमते। तस्मात् गतिविशेषे सति यत् ध्रुवम्–अवधित्वेन विवक्षितत्वे सति तदतिरिक्तस्यावधित्वोपयोगिव्यापारस्यानाश्रयं तदपादानमिति ध्रुवमपायेऽपादानमिति सूत्रस्यार्थवर्णयन्ति। तथा चोक्तम् ''यस्मादपाये गतिविशेषे सति यद्ध्रुवमवधिभावोपगमाश्रयत्वे सति तदतिरिक्तस्यावधित्वोपयोगिव्यापारस्यानश्रयं तदपादानमिति सूत्रार्थः। एवञ्चास्मिन् त्रासादीनामवधित्वोपयोगित्वमस्ति इति स्वीकृत्य प्रश्न, उत्तरस्य तु–न तेषामवधित्वोपयोगित्वमित्याशयात्। तथा चोक्तम् उद्योते त्रासादीनामवधित्वोपयोगितां मन्यमानस्य प्रश्नः। उत्तराशयस्तु–न तदवधित्वोपयोगि अश्वात् पतितः, वृक्षात् पतितःइत्यादावभावात्।

अत्र विचारणीयमिदं यत् कौण्डभट्टाभिमतेऽपादानत्वे भाष्यविरोधमुपपाद्य ईदृशं व्याख्यानं कुर्वता नागेशेन मंजूषायामपादानत्वस्य स्वरूपम्–तत्तत्कर्तृसमवेत तत्रक्रियाजन्यप्रकृतधात्ववाच्य विभागाश्रयत्वम–पादानत्वमिति प्रत्यपादि। एतादृशापादानत्वस्वीकारे उक्तभाष्यविरोधोऽस्ति नवेति ? तत्र भाष्यविरोध एव प्रतीयते।

''धावतः पतितः चैत्रः'' इत्यादौ चैत्रसमवेतपतधात्वर्थक्रियाजन्य–प्रकृतधात्ववाच्य विभागस्य धावत्यश्वेऽपि विद्यमानत्वेन ध्रुवत्वाभावादपा–दानत्वाभाव इति शंकापरंभाष्यंतत्समाधानपरञ्चभाष्यं विरुद्ध एव। तादृशावधित्वं गतिमत्यश्वे स्वयमेव स्वीकृतं नागेशेनैव। तथा हि–''पर्वतात्पततोऽश्वात् पतत्यश्ववाह इत्यादावश्वस्यापादानत्वाय तत्स्वीकारात्''।

*सहायकः प्राध्यापकः*
*शासकीय–अभयानन्द–संस्कृत–महाविद्यालयः,*
*कल्याणपुरम्, शहडोलः (म.प्र.)*

–––000–––